# Vighneshvara Manasikam

# વિઘ્નેશ્વરમાનસિકમ્

## Document Information

Text title : Vighneshvara Manasikam

File name : vighneshvaramAnasikam.itx

Category : ganesha

Location : doc_ganesha

Author : Chidambara Suri

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 3 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : January 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 2, 2023

*sanskritdocuments.org*

# વિઘ્નેશ્વરમાનસિકમ્

શ્રીમહાગણપતયે નમઃ ।

વિઘ્નેશ્વરસ્ય વિષયે હૃદિ માનસાખ્યાં
પૂજાં વિધાતુમુચિતં સરસં પ્રબન્ધમ્ ।
વિદ્વજ્જને ધુરિ ચિદમ્બર એષ નમ્રઃ
શ્લોકૈર્વસન્તતિલકૈર્વિતનોતિ શીઘ્રમ્ ॥ ૧॥

કાન્તાકૃતિં ગમિતયા કમનીયકાન્ત્યા
સત્યા સદાપિ નિજયા નવરત્નપીઠે ।
કાન્તં વસન્તમમરેન્દ્રમુખાગ્રવન્દ્યં
દન્તાવલેનવદનં હૃદિ ભાવયામિ ॥ ૨॥

આગચ્છ દન્તિવદનાદ્ય જયાસમેતઃ
સત્યાખ્યયા દયિતયા સહ પૂજનાય ।
અલ્પાં કૃતામપિ મયા ત્વયિ દેવ પૂજાં
સ્વીકૃત્ય ભક્તવશગેશ મયિ પ્રસીદ ॥ ૩॥

રત્નૈઃ કૃતં નવભિરત્ર તુ ચિત્રચિત્રં
પારીન્દ્રવેષમમરેન્દ્રકરોપનીતમ્ ।
આસ્થાય ચાસનમિદં ધૃતવલ્લભસ્ત્વં
સામ્રાજ્યમાકલય મે ગજવક્ત્ર ચિત્તે ॥ ૪॥

વેદાન્તકાનનચરં વિવિધાહવાદિ-
વેશન્તકૢપ્તવિહૃતિં વિબુધેન્દ્રભાવ્યમ્ ।
વિઘ્નેશ્વરં વિધૃતવલ્લભમઙ્ગદેશ
આવાહયામિ હૃદયે સદયાન્તરઙ્ગમ્ ॥ ૫॥

ગઙ્ગાયમસ્વસૃજલૈર્હરિરત્નમુક્તા-
પાત્રેઽર્પિતૈઃ સુરભિભિઃ સુખશીતલૈશ્ચ ।
મૃદ્વઙ્ગુલીદલયુતે પદપદ્મયુગ્મે

પાદ્યક્રમં કલય પદ્મમુખ પ્રભો ત્વમ્ ॥ ૬॥

સહ્યાદ્રિજાહૃતમસહ્યમહાઘહારિ
દૂર્વાગ્રદર્ભસુમગર્ભમદક્ષતાઢ્યમ્ ।
ભર્માગ્રપાત્રપરિપૂર્ણમિદં મહાર્ઘ-
મર્ઘ્યં ગૃહાણ મદનર્ઘવપુર્ગજાસ્ય ॥ ૭॥

મલ્લીપ્રસૂનનવચમ્પકકુડ્મલૌઘ-
સૌરભ્યનિર્ભરમુપાસકચિત્તશુભ્રમ્ ।
વ્યોમાપગાસલિલમદ્ય મયા પ્રદત્ત-
માચમ્યતાં ગજમુખ પ્રણતાર્તિહારિન્ ॥ ૮॥

મોચાફલેન નવશર્કરયા ઘૃતેન
ગવ્યેન સાધુ મધુના ત્વધુના પ્રણીતમ્ ।
પઞ્ચામૃતં ગજમુખાનતપઞ્ચતારે
પઞ્ચાનનાત્મજ વિધેહિ નિમજ્જનાય ॥ ૯॥

સન્માનસાદિશુચિભિર્ધુરિ માનસાખ્યં
સત્તીર્થ કોટિજઠરાહૃતતીર્થસાર્થૈઃ ।
સંસ્નાપયામિ તવ મઙ્ગલદિવ્યદેહ-
મુદ્વર્તનેન સહ વારણરાજવક્ત્ર ॥ ૧૦॥

ચીનામ્બરેણ કનકાઞ્ચલમઞ્જુલેન
દિવ્યં ત્વદઙ્ગમખિલં જલમજ્જનાર્દ્રમ્ ।
દ્રાઙ્ માર્જયામિ નિખિલાઘનિમાર્જનાય
કિઞ્ચિદ્ ગજાસ્ય ધુરિ તિષ્ઠ મમ પ્રભો ત્વમ્ ॥ ૧૧॥

કાર્પાસસૂત્રગુણિતં વિશદં પ્રક્લૃપ્તં
યજ્ઞોપવીતયુગલં નિગલં દ્વિજત્વે ।
હૈમૈરથાસમગુણૈઃ સહ યજ્ઞસૂત્રૈ-
રામં ચ મુઞ્જમથિ કાષ્ણર્યહતં ધૃતં ચ (? ) ॥ ૧૨॥

જામ્બૂનદૈર્વિરચિતે નવભાજનેઽગ્રે
દધ્ના સહૈવ મધુના મિલિતં પ્રક્લૃપ્તમ્ ।
તદ્વચ્છરાવપિહિતં મધુપર્કમેત
હસ્તે તવાદ્ય વિતરામિ ચ હસ્તિવક્ત્ર ॥ ૧૩॥

કસ્તૂરિકામૃગમદૈઃ પરિમૃદ્ય ક્લૃપ્તં
 ત્વત્કીર્તિસારમિવ શોભનગન્ધપૂરમ્ ।
હસ્તીન્દ્રવક્ત્ર સુગુણોર્મિલમઙ્ગમઙ્ગ
 શ્રીગન્વપઙ્કમનુલિમ્પ નિલિમ્પનાથ ॥ ૧૪॥

શાલ્યક્ષતૈરતિતરામપરિક્ષતાગ્રૈઃ
 શ્રીકુઙ્કુમાઙ્કપરિશોભિનિજાઙ્ગભાગૈઃ ।
ગન્ધોપરિ સ્ફુટતરીકરણાય હસ્તિ-
 વક્ત્રાર્ચયામિ હરિચન્દનચર્ચિત ત્વામ્ ॥ ૧૫॥

મન્દારકુન્દકરવીરકચમ્પકાગ્ર્ય-
 મલ્લીમુખાનિ કુસુમાનિ તવાર્પયામિ ।
તાન્યઙ્ગમઙ્ગમપરિક્ષત ભૂષય ત્વં
 સત્ર્યેકવિંશતિદલૈર્ગજરાજવક્ત્ર ॥ ૧૬॥

છત્રધ્વજામ્બુજઘટાઙ્કુશરેખિકાઙ્કૌ
 પાથોજમાર્દવવિમર્દનનિર્દયાઙ્ગૌ ।
હસ્તીન્દ્રવક્ત્ર તવ ભર્મવિનિર્મિતાભ્યાં
 સંયોજયામિ ચરણૌ મણિપાદુકાભ્યામ્ ॥ ૧૭॥

કણ્ઠે કરે શિરસિ તે મણિનિષ્કભૂષાં
 રત્નચિતં ચ કટકં મકુટં મણીદ્ધમ્ ।
અઙ્ગેઽખિલે કનકભૂષણજાલકા નિ
 ભક્ત્યા સહૈવ ઘટયે કરટેન્દ્રવક્ત્ર ॥ ૧૮॥

નક્ષત્રપઙ્ક્તિનિભમૌક્તિકરાજિરાજ-
 માનાઞ્ચલં ચરસુધાકરમણ્ડલાભમ્ ।
શ્વેતાતપત્રમતિચિત્રમિભેન્દ્રવક્ત્ર
 મૂર્ધોપરિ સ્ફુટતરં તવ ધારયામિ ॥ ૧૯॥

ચામીકરસ્ફુરિતરત્નવિચિત્રદણ્ડૌ
 ચારુપ્રભાલિરુચિરૌ તવ ચામરૌ દ્વૌ ।
સ્નાનક્ષણાવસરઘર્મપયઃકણાર્દ્રે
 સઞ્ચાલયામિ ગજવક્ત્ર મુખે કરાભ્યામ્ ॥ ૨૦॥

નૂત્નં ચ રત્નચરમાઙ્ગમુદારમગ્રે
 રૂપોદ્વહં ચ મણિદર્પણમર્પયામિ ।

ભાદર્પદર્પકવપુર્જયિનીં તવાદ્ય
    કલ્યાણમૂર્તિમિભવક્ત્ર વિલોકયાત્ર ॥ ૨૧॥

અઙ્ગારસઙ્ગસુરભિં સુરભિપ્રજાત-
    હૈયઙ્ગવીનઘૃતયુક્તદશાઙ્ગધૂપમ્ ।
ઘ્રાણેન્દ્રિયપ્રિયકરં પરિજિઘ્ર શીઘ્રં
    ભક્ત્યાર્પિતં ગજમુખ પ્રિયગન્ધ દેવ ॥ ૨૨॥

બાહ્યાન્ધકારગુણબન્ધનલોકબન્ધુ-
    માજ્યાઢ્યપાત્રકૃતવર્તિસમુજ્જ્વલં તે ।
ત્રૈલોક્યગાઢતિમિરાપહભાસિ વક્ત્રે
    સન્દર્શયામિ ધુરિ દીપમિભેન્દ્રવક્ત્ર ॥ ૨૩॥

મોચાદ ધિત્થપનસામ્રફલાદિયુક્તં
ભક્ષ્યૌઘશષ્કુલિસલડ્ડુકમોદકાઢ્યં
    સૌવર્ણવર્ણસમસૂપઘૃતૌઘપૂર્ણમ્ ।
     શાલ્યન્નમેતદુપભુઙ્ક્ષ્વ ગજાસ્ય ચારુ ॥ ૨૪॥

એલાલવઙ્ગસુમચમ્પકકુડ્મલાગ્ર-
    કર્પૂરવાસિતમુદારમુશીરગન્ધિ ।
પાનીયમભ્રસરિતઃ કમનીયશુભ્ર-
    માનીયતાં ગજમુખાનનમેકદન્તમ્ ॥ ૨૫॥

વાર્તાકકણ્ટકિરસારકકારવલ્લિ-
    રમ્ભાશલાટુમુખચારુપદાર્થજાતમ્ ।
આજ્યાક્તસર્ષપસજીરકહિઙ્ગુકૈલા-
    સમ્ભર્જિતં ગજમુખાદ્ધિ પદે પદે ચ ॥ ૨૬॥

હસ્તીન્દ્રવક્ત્ર સરસં તુ મયા પ્રદત્તં
    રમ્ભાફલૈર્મધુચરૈઃ સિતશર્કરાભિઃ ।
એલામરીચિસમશર્કરદુગ્ધસિદ્ધં
    ગોધૂમતણ્ડુલસુરાન્નમુપાદદસ્વ ॥ ૨૭॥

માષૈસ્તિલૈઃ સગુડશર્કરનાલિકેરૈ-
    ર્જમ્બીરસર્ષપવરામ્લફલૈરુતાન્યૈઃ ।
તત્ર પ્રયોગકલિતાનિ વિચિત્રિતાનિ
    સ્વન્નાનિ ભુઙ્ક્ષ્વ ગજવક્ત્ર રસેન સાકમ્ ॥ ૨૮॥

મલ્લીસુમચ્છવિસુવર્ણસવર્ણશાલિ
 શાલ્યન્નમેતદુપમર્દ્ય પયસ્તથૈવ ।
એતે કરેણ મિલિતે વિરચય્ય શુદ્ધે
 ભુઙ્ક્ષ્વોપદંશિતગુડં ગજરાજવક્ત્ર ॥ ૨૯॥

મણ્ડોપયુક્તદધિખણ્ડકમેતદેત-
 ચ્છુદ્ધાન્નમાશુ મિલિતં દ્વયમદ્ય ક્લૃપ્ત્વા ।
ખણ્ડામ્લસર્ષપરસાલવરોપદંશૈ-
 ર્ભુઙ્ક્ષ્વેભવક્ત્ર સહ નિમ્બકખણ્ડચૂર્ણૈઃ ॥ ૩૦॥

જમ્બીરતાચ્યુત સુબિલ્વકરીરચૂત-
 નારઙ્ગમુખ્યમુપદંશકુલં સુજાતમ્ ।
હિઙ્ગ્વગ્રસર્ષપરસાલવરોટમુખ્યૈઃ (બહુસાધનાગ્રૈઃ)
 સમ્મિશ્રિતં ચ પરિશીલય ભુક્તિકાલે ॥ ૩૧॥

ઔર્વારુકં ધુરિ રસાયનમેતદેતદ્
 ગૌડં તુ પાનકમિદં સરસેક્ષુસારમ્ ।
કાપિત્થપાનકમિદં કરિવક્ત્ર કિઞ્ચિત્
 કિઞ્ચિત્ પિબૈષુ વિભવાય યથેષ્ટતોઽદ્ય ॥। ૩૨॥

સત્કૃષ્ણનિમ્બદલનાગરહિઙ્ગુબાલ-
 રમ્ભાગ્રદણ્ડવરસૈન્ધવજમ્ભસારૈઃ ।
આલોડિતં પરિમલૈર્મિલિતં ગજાસ્ય
 ત્વં નીરતક્રમુપભુઙ્ક્ષ્વ ચ દાહશાન્ત્યૈ ॥ ૩૩॥

હેમ્ના કૃતે મણિચિતે રુચિરેઽત્ર પાત્રે
 હેમાવતીજલમિદં ગજવક્ત્ર શુભ્રમ્ ।
એલા દિવ સિતગુણં હિમનીરશીત-
 માપોઽશન ચરમમાશુ સમાચર ત્વમ્ ॥ ૩૪॥

શોણામ્બુજાધરતલં શુભમાર્દવાઢ્ય-
 મુષ્ણામ્બુના સુરભિલેન તવાદ્ય પાણિમ્ ।
દ્રવ્યેણ ઘર્ષણવિધૌ સિતયોપમૃદ્ય
 પ્રક્ષાલયેભમુખ કલ્મષલેશહીન ॥ ૩૫॥

નિર્દોષતામુપગતેન વિભો સુવર્ણ-

સ્થાલ્યાં સ્થિતેન હિમશીતગુણેન સદ્યઃ ।
હસ્તીન્દ્રવક્ત્ર પયસા પુનરાદરેણ
શુદ્ધં ત્વમાચમનમાચર ભોજનાન્તે ॥ ૩૬॥

પૂગા ઇમે કપિશિતા પરિપાકરીત્યા
શ્વેતા ઇમે કટુરસા મધુનાગવલ્ય઼ઃ ।
કર્પૂરચૂર્ણમિદમેભિરિભાસ્ય રાગા-
ચ્છોણીકુરુ ત્વદધરં સમમાસ્યશુદ્ધ્યા ॥ ૩૭॥

દેદીપ્યમાનમહસિ દ્રુતહેમપાત્રે
મુક્તામણીવિરચિતામ્બુજરેખિકાન્તઃ ।
કર્પૂરખણ્ડપરિદીપિતમેતદગ્રે
નીરાજનં ગજવરાનન દર્શયામિ ॥ ૩૮॥

ગઙ્ગાકવેરતનયાવરતુઙ્ગભદ્રા-
ગોદાવરીરવિસુતાસુસમાહૃતાભિઃ ।
અદ્ભિર્દદામિ પુનરર્ઘ્યમિભેન્દ્રવક્ત્ર
(સ) તત્ ત્વં ગૃહાણ નિગૃહાણ તમો મદીયમ્ ॥ ૩૯॥

મલ્લીપ્રસૂનનવચમ્પકકુન્દજાતિ-
મન્દારમુખ્યસુમનોભિરભિસ્ફુટાભિઃ ।
મન્ત્રૈઃ સમં શ્રુતિચતુષ્ટયસંસ્તુતૈસ્તે
પુષ્પાઞ્જલિં ગજમુખાનિશમર્પયામિ ॥ ૪૦॥

વેદાન્તમૂર્ધશતગૂઢ શતોઙ્ઘ્રિતસ્ત-(? )
નાથાન્તભાવિત ગણાધિપ શક્તિનાથ ।
શ્રીમન્ ત્વદીયપદભક્તમિમં સદા મા
મામન્તકાન્તકસુતામલ મુઞ્ચ મુઞ્ચ ॥ ૪૧॥

ભાગ્યાધિનોગ્યકરમદ્ય પદે પદે ચ
ભક્ત્યા પ્રદક્ષિણમહં કલયે ગજાસ્ય ।
રક્ષ પ્રતીક્ષણમપાસ્ય હૃદાવિલમ્બં
વીક્ષસ્વ માં પરિગૃહીતદયાવલમ્બમ્ ॥ ૪૨॥

હસ્તીન્દ્રવક્ત્ર ગણનાથ નમો નમસ્તે
સ્વસ્તીન્દ્ર મુખ્યનુત દેહિ નમો નમસ્તે ।
નસ્તીવ્રમગ્રમુપયાહિ નમો નમસ્તે

વિસ્તીર્ણવૈભવનિધેઽદ્ય નમો નમસ્તે ॥ ૪૩॥

મઞ્ચે સુવર્ણવિતતે મણિજાલચિત્રે
ડોલાવૃતેઽપ્યુપરિભાગવિતાનચિત્રે ।
મૃદ્વાસ્તરા મુપરિમઞ્જુલહંસતૂલિ-
મધ્યાસ્ય શેષ્વ ગજવક્ત્ર મૃદૂપવાનામ્ ॥ ૪૪॥

આલિઙ્ગિતો દયિતયા ગણનાથ શક્ત્યા
સર્વાઙ્ગશોભનગુણોજ્જ્વલરૂપલક્ષ્મ્યા ।
આનઙ્ગસઙ્ગરમુખૈર્વિવિધૈર્વિલાસૈ-
રાનન્દભારમધિકં ભજ હસ્તિવક્ત્ર ॥ ૪૫
બાહ્યં વિધાતુમપટુસ્તવ પૂજનં યત્
પદ્મેન્દ્રવક્ત્ર તદહં હૃદિ માનસાખ્યમ્ ।
ત્વત્પૂજનં રચિતવાંશ્ચતુરુત્તરૈશ્ચ
પદ્યૈસ્તથા દશચતુષ્ટયસંસ્થિતૈશ્ચ ॥ ૪૬॥

ત્વાં પૂજયન્ હૃદિ ભજન્ દૃશિ લક્ષયંશ્ચ
શ ૃણ્વઞ્છ્રુતૌ ચ ગદિતં તવ રૂપમેવ ।
સમ્ભાવયન્ ગજવરાનન દર્શયામિ
ત્વં દેવ દેવ મયિ ધેહિ કૃપાકટાક્ષમ્ ॥ ૪૭॥

ચસ્વારિંશદુપર્યધિષ્ઠિતચતુઃશ્લોકાત્મસઙ્ખ્યાન્વિતાન્
પ્રોક્તાન્ યાનુપચારકાંસ્તવ વિભો હસ્તીન્દ્રવક્ત્રાનિશમ્ ।
પ્રત્યૂષે હૃદિ ભાવયન્તિ પુરુષા યે તેષુ કુર્યાદ્ ભવાન્
સમ્પૂર્ણાં પુરુષાર્થસિદ્ધિમતુલાં સન્તોષધારાધિકામ્ ॥ ૪૮॥

વિદ્યાધિનેતરિ ચિદમ્બરસૂરિક્લૃપ્તા
સમ્ભાવનાદિપરમપ્રમદાવસાનૈઃ ।
પૂજોપચારવિધિભિર્ભુવિ માનસાખ્યા
જીયાચ્ચિરં સુવિદુષાં હૃદયઙ્ગમેયમ્ ॥ ૪૯॥

ઇતિ શ્રીચિદમ્બરસૂરિકૃતં શ્રીવિઘ્નેશ્વરમાનસિકં સમ્પૂર્ણમ્ ।

Notes given in the source: The manuscript is
very badly written. The scribe hardly makes a
distinction between the alpaprANa and mahAprANa

letters; always writes asti for hasti; thus
the manuscript is very defective and in some
places, it has not been possible to reconstruct
the text. From the allusions in the text, it may
be inferred that the author belonged to a place
on the bank of the river hemAvatI (see verse 34).

Proofread by Sivakumar Thyagarajan Iyer

---

*Vighneshvara Manasikam*
pdf was typeset on January 2, 2023

Please send corrections to *sanskrit@cheerful.com*